# Code No. 1756

**CLASS : 11th (Eleventh)** **Series : 11-April/2021**

*रोल नं०* ☐☐☐☐☐☐☐☐☐☐

## उत्तर मध्यमा (प्रथम वर्ष) संस्कृत साहित्य कोड 1103ए (आधुनिक आर्ष पद्धति)

(Only for Fresh/School Candidates)

*समय : **$2\frac{1}{2}$** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***नोट :* सर्वे प्रश्नाः समाधेयाः।**

***सभी प्रश्न अनिवार्य हैं।***

**भाग - अ**

**(वस्तुनिष्ठात्मकःप्रश्नाः)**

**1.** निम्नांकितप्रश्नानामुत्तराणि विकल्पेषु समुचित विकल्पानि चित्वा दातव्यानि – $1 \times 10 = 10$

निम्नलिखित प्रश्नों का उत्तर विकल्पों में से समुचित विकल्प चुनकर दें –

(i) अम्बिकादत्तव्यासः कस्य ग्रन्थस्य रचनाकारो वर्तते –

(क) स्वप्नवासवदत्तस्य (ख) शिवराजविजयस्य

(ग) मेघूदतस्य (घ) हितोपदेशस्य

(ii) अम्बिकादत्तव्यासस्य पितुर्नाम किमासीत् ?

(क) दुर्गादत्तः (ख) देवीदत्तः

(ग) रामदत्तः (घ) ब्रह्मादत्तः

(iii) शिवराजराज्ञो वर्णनं कस्मिन् ग्रन्थे कृतं वर्तते ?

(क) शिवराजजये (ख) शिवराजवीरे

(ग) शिवराजक्षत्रीये (घ) शिवराजविजये

(iv) अम्बिकादत्तव्यासेन स्वग्रन्थे कस्य रसस्य प्रधानतया प्रयोगः कृतः ?

(क) वीरस्य (ख) श्रृंगारस्य

(ग) करूणस्य (घ) विप्रलम्भस्य

(v) गद्यकाव्यं कतिप्रकारकं भवति –

(क) पञ्च (ख) चतुर्धा

(ग) अष्टौ (घ) सप्त

(vi) शिवराजविजयनामको ग्रन्थः कस्यां शैल्यां लिखितम् ?

(क) गद्यशैल्याम् (ख) पद्यशैल्याम्

(ग) खण्डकाव्यशैल्याम् (घ) चम्पूशैल्याम्

(vii) सूर्यस्य का संज्ञा आसीत् शिवराजविजये ?

(क) भानुमाली (ख) दिनकरमाली

(ग) दिवाकरमाली (घ) मरीचिमाली

(viii) रात्रौ तोरणदुर्गं प्रति कः आगतः ?

(क) श्यामसिंहः (ख) गौरसिंहः

(ग) शहाबुद्दीनः (घ) रघुवीरसिंहः

(ix) रघुवीरसिंहस्य मार्गः कीदृशः आसीत् ?

(क) जलपूरितः (ख) कण्टकावृत्तः

(ग) शिलाव्याप्तः (घ) पुष्पाच्छादितः

(x) हनुमानमन्दिरं कः पलायमानो गतः ?

(क) शहाबुद्दीनः (ख) शिवाजीमहोदयः

(ग) श्यामगौरसिंहौ (घ) रघुवीरसिंहः

**2.** रिक्तस्थानानि समुचितोत्तरैः पूरयत – 1 × 15 = 15

रिक्तस्थानों को उचित उत्तर से पूर्ण करें –

(i) गायकवेषेण अफजलखानस्य समीपं .............. गतवान्।

(क) गौरसिंह (ख) बहादुरसिंहः

(ग) खड्गसिंहः (घ) वीरसिंहः

(ii) दास्यवः श्यामगौरसिंहयोः अपहरणं .............. काले कृतवत्यः।

(क) यौवनकाले (ख) वृद्धकाले

(ग) किशोरकाले (घ) बाल्यकाले

(iii) रघुवीरसिंहः .............. बालिकां दृष्ट्वा मोहितो बभूव।

(क) नृत्यन्तीम् (ख) शयानाम्

(ग) गायन्तीम् (घ) क्रीडन्तीम्

(iv) माल्यश्रीः शिववीरस्य .............. आसीत्।

(क) रिपुः (ख) मित्रम्

(ग) स्वामी (घ) भृत्यः

(v) शिवराजविजयग्रन्थस्य औरंगजेबः .............. आसीत्।

(क) नायकः (ख) खलनायकः

(ग) लेखकः (घ) प्रतिनायकः

(vi) कार्यं वा साधयेयम् देहो वा ............. ।

(क) रक्षेयम् (ख) पोषयेयम्

(ग) पातयेयम् (घ) स्वापयेयम्

(vii) 1087 तमे वैक्रमाब्दे ............. प्राणानत्यजत्।

(क) गजनवी (ख) शहाबुद्दीनः

(ग) शिववीरः (घ) अफजलखानः

(viii) अफजलखानः विजयपुराधीश्वरस्य ............. आसीत्।

(क) मन्त्री (ख) सेनानी

(ग) सेवकः (घ) सेनापतिः

(ix) गौरसिंहः ............. आसीत्।

(क) ब्राह्मणः (ख) पुजारी

(ग) दासः (घ) क्षत्रीयः

(x) शास्तिखानः विजयपुरस्य ............. आसीत्।

(क) राजा (ख) प्रजा

(ग) दासः (घ) सेनापतिः

(xi) द्वादशबारं ............. भारतवर्षमलुष्ठत।

(क) शहाबुद्दीनः (ख) गजनवी

(ग) कुतुबुद्दीनः (घ) औरंगजेबः

(xii) औरंगजेबः ............. उपाधिना विभूषितः आसीत्।

(क) आलमगिर (ख) शहंशाह

(ग) नायक (घ) राजपुत्र

(xiii) श्यामगौरसिंहयोः पुरोहितस्य नाम ............. आसीत्।

(क) ब्रह्मशर्मा (ख) विष्णुशर्मा

(ग) देवशर्मा (घ) भद्रशर्मा

(xiv) कोसला श्यामगौरसिंहयोः ............. आसीत्।

(क) भगिनी (ख) भार्या

(ग) स्वामिनी (घ) दासी

(xv) समाधिस्थो मुनिः ............. आसीत्।

(क) देवालये (ख) कन्दरायाम्

(ग) कानने (घ) राजगृहे

**3.** एक पदेन उत्तरं ददत – 1 × 15 = 15

एक पद में उत्तर दें –

(i) अपहृतां बालिकाम् अन्वेष्टुं कः गतवान् ?

(ii) अफजलखानस्य पार्श्वे गोपीनाथपण्डितं कः प्रेषितवान् ?

(iii) बिहारराज्यसंस्कृतसंजीवनीसमाजस्य स्थापना केन कृता ?

(iv) युधिष्ठिरस्य काले कः प्रथमतया समाधिमाकिलितवान् ?

(v) दुर्गादत्तः कस्य पिता आसीत् ?

(vi) गायकवेषेण अफजलखानस्य समीपं कः गतवान् ?

(vii) राजपुत्रादेशीयः क्षत्रीयः कः आसीत् ?

(viii) गुर्जरप्रदेशे किं तीर्थम् अस्ति ?

(ix) कुतुबुद्दीनः कस्य क्रीतदासः आसीत् ?

(x) रघुवीरसिंहः कां दृष्ट्वा मोहितो बभूव ?

(xi) औरंगजेबः केन उपाधिना विभूषितः ?

(xii) गजनीदेशस्य निवासी कः आसीत् ?

(xiii) 'रात्रिर्गमिष्यति भविष्यति सुप्रभातम्' इति पंक्तिः कुतः उद्धृता वर्तते ?

(xiv) श्रीमद्भगवद्गीताग्रन्थस्य सप्तम-अध्यायस्य नाम किम् ?

(xv) भक्ताः कतिविधाः भवन्ति ? गीतानुसारम्।

**भाग – ब**

**4.** अग्रलिखितगद्यांशेषु केषांचित् ***सप्त***गद्यानां व्याख्या सप्रसंगं कार्या – 2 × 7 = 14

अग्रलिखित गद्यांशों में से किन्हीं ***सात*** गद्यों की व्याख्या प्रसंगानुसार करें –

(i) मुने ! विलक्षणोऽयं भगवान् सकलकलाकलापकलनः सकलकालनः करालः कालः। स एव कदाचित् पयः पूर-पूरितान्यकूपारतलानि मरुकरोति।

(ii) सिंह-व्याघ्र-भल्लूक-गण्डक-फेरू-साहस्र-व्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-हर्म्य-शृंगाटक-चत्वरोधानतडाग-गोष्ठमयानि नगराणि च काननीकरोति।

(iii) सत्यं न लक्षितो मया समयवेगः। यैधिष्ठिरे समये कलितसमाधिरहं वैक्रमसमये उदस्थाम्। पुनश्च विक्रमसमये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि।

(iv) भगवान् ! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यवनान् परस्सहस्त्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मान आर्य्यवंश्यांश्चाऽभिमन्यामहे।

(v) दौवारिक ! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वदृक्षा एवं प्रभूणां पुरस्कारभाजनानि भवन्ति, लोकद्वयं च विजयन्ते। तव प्रामाणिकतां जानीत एवाऽत्रभवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि।

(vi) "वत्स गौरसिंह !" अहमत्यन्तं तुष्यामि त्वयि, यत् त्वमेकाकी अफजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्च ब्राह्मणतनयांश्च मोचयित्वा आनीतवानसीति। कथं न भवेरीदृशः ? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्।

(vii) तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा सः समाधिम् अङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणभन्ति स्तुवन्ति च।

(viii) तदाकर्ण्य विविधमावभङ्गभासुरवदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरंगतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य विजयतां शिववीरः, सिध्यन्तु भवतां मनोरथाः ''इति मन्दं व्याहार्षीत्''।

(ix) यावद् गौरसिंहः किमपि विवक्षति तावत् प्रतीहारः प्रविश्य 'विजयतां महाराजः' इति त्रिर्व्याहृत्य करौ सम्पुटीकृत्य, शिरो नमयित्वा कथितवान्-भगवन् ! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते।

**लघूत्तरीयप्रश्नाः**

**(लघूत्तरीय प्रश्न)**

**5.** निम्नांकित श्लोकेषु कयोश्चिद् ***द्वयोः*** व्याख्या कार्या – $3 \times 2 = 6$

निम्नांकित श्लोकों में से किन्हीं ***दो*** की व्याख्या करें –

(i) नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढ़ोऽयं नाभिजानाति लोको मामजमव्ययम्।।

(ii) जरामरणमोक्षाय मामाश्रित्य यतन्ति ये।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्।।

(iii) अव्यकतं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममात्ययमनुत्तमम्।।

(iv) ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।।

**दीर्घउत्तरीयप्रश्नाः**

**(दीर्घ उत्तरीय प्रश्न)**

**6.** अधोलिखितपद्यानां व्याख्या सन्दर्भ-प्रसंग-अन्वय-अर्थ-सहितं कार्या – $5 \times 4 = 20$

अधोलिखित पद्यों की व्याख्या सन्दर्भ प्रसंग अन्वय अर्थ के साथ करें –

(i) नाहं प्रकाशः सर्वस्य योगमायासमावृतः।

मूढ़ोदयं नाभिजानाति लोकमामजमव्ययम्।।

(ii) पुण्यो गन्धः पृथिव्यां च चेतसास्मि विभावसौ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु।।

(iii) रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदिष्यति हसिस्यति पंकजश्रीः।
इत्त्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त ! हन्त ! नलिनीं गज उज्जहार।।

(iv) बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्।।